International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(2): 59-61
© 2025 IJMH
www.themultijournal.com

Received: 23-04-2025
Accepted: 28-04-2025
Publish : 30-04-2025

**पिड्गु नागसाई**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**पिड्गु नागसाई**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# शिवकृष्णकर्णामृतयोः रचनासौन्दर्यसाम्यम्

**पिड्गु नागसाई**

## १. प्रस्तावना

संस्कृतसाहित्ये स्तोत्रकाव्यानां महत्त्वपूर्णं स्थानं वर्तते। भक्तिरसस्य माधुर्यगाम्भीर्यादिभिरनेकैः रूपैः कविभिः स्वकीयेषु काव्येषु वर्णनं कृतम्। तेषु भक्तिकाव्येषु **श्रीकृष्णकर्णामृतम् श्रीशिवकर्णामृतञ्च** अद्वितीयस्थानमधिकुरुतः। उभे अपि एते काव्ये 'कर्णामृत'शब्देन विभूषिते स्तः। कर्णयोः आमृतमिव मधुरं पेयमिति हि तयोः नाम्ना अभिधीयते। उभयोः काव्ययोः भक्तिरसेन सह काव्यसौन्दर्यमपि अद्वितीयं वर्तते।

### १.१ श्रीकृष्णकर्णामृतस्य परिचयः

**श्रीकृष्णकर्णामृतस्य** रचयिता **लीलाशुकः**। अस्य कालः द्वादशशतकम् इति केचित्, त्रयोदशशतकम् इति केचित् वदन्ति। अनेन कृष्णभक्तिरसेन स्वकीयां प्रतिभां सिञ्चित्वा मधुरतमान् श्लोकान् प्रणीतवान्। अस्य काव्ये त्रयः आश्वासाः सन्ति। प्रथमाश्वासे ११२, द्वितीयाश्वासे १०९, तृतीयाश्वासे ११२ इति मिलित्वा ३३३ श्लोका वर्तन्ते। केषुचित् संस्करणेषु अतिरिक्तश्लोका अपि दृश्यन्ते।

अस्मिन् काव्ये बालकृष्णस्य लीलाः, यमुनातीरे विहारः, गोपीजनानुरागः, वेणुनादस्य माधुर्यम् इत्यादयः विषयाः अत्यन्तरमणीयतया वर्णिताः। कविः स्वानुभूतिं शब्दैः चित्रयन् पाठकहृदयं द्रावयति। अत्र माधुर्यभक्तेः परिपाकः सर्वत्र दृश्यते।

### १.२ श्रीशिवकर्णामृतस्य परिचयः

**श्रीशिवकर्णामृतस्य** प्रणेता तु **श्रीमदप्पय्यदीक्षितः**। अयं हि षोडशशतकस्य (१५२०-१५९३) प्रसिद्धः आलङ्कारिकः, वैयाकरणः, वेदान्ती, शिवभक्तश्च। अनेन शिवभक्तिरसेन स्वकीयां प्रतिभां विकास्य अद्वितीयं काव्यं रचितम्। अस्य काव्ये त्रयः अध्यायाः सन्ति। प्रथमाध्याये १०२, द्वितीयाध्याये १०२, तृतीयाध्याये १६४ इति मिलित्वा ३६८ श्लोका वर्तन्ते।

अस्मिन् काव्ये शिवस्य बाललीलाः, गौरीसहितस्य विहारः, ताण्डवनृत्यम्, भस्मधारणम्, त्रिपुरदहनम् इत्यादयः विषयाः अद्भुतकल्पनया वर्णिताः। अस्मिन् काव्ये षष्ट्यधिकाः अलङ्काराः प्रयुक्ताः सन्ति; बन्ध-गर्भ-चित्रकवित्वानामपि सुन्दरः प्रयोगः दृश्यते।

### १.३ तुलनायाः प्रयोजनम्

उभयोः काव्ययोः विषयः भिन्नः – एकत्र कृष्णभक्तिः, अपरत्र शिवभक्तिः। तथापि रचनाशिल्पस्य दृष्ट्या, अलङ्कारयोजनायाः दृष्ट्या, भावचित्रणस्य दृष्ट्या च अनेकानि साम्यानि दृश्यन्ते। काव्यद्वयमिदं परस्परं स्पर्धते इव प्रतिभाति। यथा भारवेः किरातार्जुनीयस्य माघस्य शिशुपालवधः, यथा मयूरस्य सूर्यशतकस्य कृष्णकार्ण्व्याः सुदर्शनशतकम् – तथैव श्रीकृष्णकर्णामृतस्य श्रीशिवकर्णामृतमिदं प्रतिस्पर्धिरूपेण विरचितम्।

अस्मिन् लेखे **शिवकृष्णकर्णामृतयोः रचनासौन्दर्यसाम्यम्** इति विषये विस्तरेण विचारः क्रियते। अत्र रचनाशिल्पस्य, श्लोकानां, भावानां च साम्यानि उदाहरणसहितानि प्रदर्श्यन्ते।

## २. श्लोकानां तुलनात्मकं विश्लेषणम्

अत्र केचन श्लोकाः सन्ति ये उभयोः काव्ययोः साम्यं स्पष्टं दर्शयन्ति। शब्दचयनं, भावाभिव्यक्तिः, अलङ्कारयोजना च इत्यादिषु अंशेषु अद्भुतं साम्यं दृश्यते। अधस्तात् केषाञ्चन श्लोकानां तुलनात्मकं विश्लेषणं प्रस्तूयते।

**२.१ देवपूजनस्य साम्यम्**

कृष्णकर्णामृते गोपीजनैः कृष्णस्य पूजनं यथा वर्णितम् –

**"अपाङ्गरेखाभिरभङ्गुराभिरनङ्गलीलारसरञ्जिताभिः।**
**अनुक्षणं वल्लवसुन्दरीभिरत्यर्थमानं विभुमाश्रयामः॥"**
(कृ.क. १.१०)

अत्र **अपाङ्गरेखाभिः** (कटाक्षरेखाभिः), **अनङ्गलीलारसेन** (कामलीलारसेन), **वल्लवसुन्दरीभिः** (गोपीभिः) च कृष्णस्य पूजनं रमणीयतया वर्णितम्। गोप्यः स्वकटाक्षैः एव कृष्णम् अर्चन्ति। अत्र भक्तेः माधुर्यरूपं प्रकटीभवति।

तथैव शिवकर्णामृते प्रमथगणैः शिवस्य पूजनं दृश्यते –

**"अनेकरूपाभिरचञ्चलाभिः समाधिनिष्ठासरसान्तराभिः।**
**प्रतिक्षणं सत्प्रमदावलीभिः प्रपूज्यमानं प्रभुमाश्रयेऽहम्॥"**
(शि.क. १.९)

अत्र **समाधिनिष्ठाः, सत्प्रमदावलीः** च शिवं पूजयन्ति। उभयत्रापि स्त्रीभिः देवस्य पूजनं वर्णितम्। किन्तु एकत्र गोप्यः, अपरत्र प्रमदाः इति भेदः। कृष्णपूजने लौकिकप्रेम्णः, शिवपूजने तु योगनिष्ठायाः गाम्भीर्यस्य च मिश्रणं दृश्यते।

**२.2 भक्तस्य आर्तप्रार्थना**

कृष्णकर्णामृते भक्तस्य आर्तप्रार्थना एकादशाक्षरवृत्ते दृश्यते –

**"हे देव हे दयित हे जगदेकबन्धो**
**हे कृष्ण हे चपल हे करुणैकसिन्धो।**
**हे नाथ हे रमण हे नयनाभिराम**
**हा हा कदा नु भवितासि पदं दृशोर्मे ॥"** (कृ.क. १.४०)

अत्र भक्तस्य हृदयवेदना, दर्शनार्थं व्याकुलता, देवं प्रति आर्तप्रार्थना च अत्यन्तं मार्मिकतया चित्रिता। 'हे देव, हे दयित, हे जगदेकबन्धो' इति सम्बोधनैः भक्तः कृष्णं बहुधा आह्वयति। अन्ते 'हा हा' इति विलापः भक्तहृदयस्य दैन्यं प्रकटयति।

तथैव शिवकर्णामृतेऽपि तादृश एव प्रयोगः –

**"हे रुद्र हे महित हे परमेश शम्भो**
**हे शर्व हे गिरिश हे शिव हे स्वयम्भो।**
**हे देव हे पशुपते करुणार्द्रचित्त**
**गन्तुं ममाक्षिपथमेष कथं विलम्बः॥"** (शि.क. १.३९)

अत्र भक्तः शिवं सम्बोधयति – **रुद्र, महित, परमेश, शम्भो, शर्व, गिरिश, शिव, स्वयम्भो, देव, पशुपते** इति। **करुणार्द्रचित्त** इति सम्बोधनेन शिवस्य करुणामयस्वभावः स्मारितः। अन्ते **"गन्तुं ममाक्षिपथमेष कथं विलम्बः"** इति प्रश्नेन भक्तस्य दर्शनार्थं व्याकुलता प्रकटिता।

अत्रापि भक्तः शिवं बहुविधसम्बोधनैः आह्वयति। उभयत्रापि भक्तस्य आर्तस्वरः, देवं प्रति प्रार्थना च, समानरूपेण प्रस्फुटितः।

**२.४ बहुविधसम्बोधनैः प्रार्थना**

कृष्णकर्णामृते भक्तस्य विविधसम्बोधनद्वारा प्रार्थना दृश्यते –

**"हे गोपालक हे कृपाजलनिधे हे सिन्धुकन्यापते**
**हे कंसान्तक हे गजेन्द्रकृपणापारीण हे माधव।**
**हे रामानुज हे जगन्मयगुरो हे पुण्डरीकाक्ष मां**
**हे गोपीजननाथ पालय परं जानामि न त्वां विना॥"** (कृ.क. २.१०७)

अस्मिन् श्लोके भक्तः कृष्णं बहुभिः नामधेयैः आह्वयति – **गोपालक, कृपाजलनिधे, सिन्धुकन्यापते** (लक्ष्मीपति), **कंसान्तक, गजेन्द्रकृपणापारीण** (गजेन्द्रं प्रति कृपया पारं गतः), **माधव, रामानुज** (बलरामस्य अनुजः), **जगन्मयगुरो, पुण्डरीकाक्ष, गोपीजननाथ** इति। एतैः सम्बोधनैः कृष्णस्य विविधाः लीलाः, गुणाः, माहात्म्यञ्च स्मारिताः। अन्ते **"जानामि न त्वां विना"** इति वचनेन भक्तस्य एकनिष्ठा प्रकटीभवति।

एवमेव शिवकर्णामृतेऽपि बहुविधसम्बोधनैः प्रार्थना वर्तते –

**"हे शम्भो शिव हे महेश्वर विभो हे वाराणसीश प्रभो।**
**हे मृत्युञ्जय हे हिमाद्रितनयाप्राणेश हे शङ्कर।**
**हे कैलासगिरीश हे पशुपते हे शेषभूषादृते**
**हे नन्दीश्वरवाहनाञ्चितगते हे देवदेवेश्वर॥"** (शि.क. १.४१)

अत्रापि भक्तः शिवं बहुविधसम्बोधनैः आह्वयति। उभयत्रापि भक्तः देवं बहुभिः नामधेयैः आह्वयति। कृष्णश्लोके गोपीसम्बन्धि नामधेयानि, शिवश्लोके तु रुद्रसम्बन्धिनामधेयानि प्रमुखानि। उभयत्रापि भक्तस्य एकनिष्ठा, देवे प्रेम, दर्शनार्थं व्याकुलता च सुन्दरतया चित्रिता।

**२.५ देवस्य शारीरवर्णनम्**

कृष्णकर्णामृते कृष्णस्य शारीरवर्णनं यथा –

**"कस्तूरीतिलकं ललाटफलके वक्षःस्थले कौस्तुभं**
**नासाग्रे नवमौक्तिकं करतले वेणुं करे कङ्कणम्।**
**सर्वाङ्गे हरिचन्दनं च कलयन् कण्ठे च मुक्तावलीं**
**गोपीभिः परिवेष्टितो विजयते गोपालचूडामणिः॥"**
(कृ.क. २.१०९)

अत्र कृष्णस्य अलङ्कारविशेषाः वर्णिताः – **ललाटे कस्तूरीतिलकम्, वक्षःस्थले कौस्तुभमणिः, नासाग्रे नवमौक्तिकम्, करतले वेणुः, करे कङ्कणम्, सर्वाङ्गे हरिचन्दनम्, कण्ठे मुक्तावलीम्** इति। अन्ते **गोपीभिः परिवेष्टितः गोपालचूडामणिः विजयते** इति वचनेन कृष्णस्य गोपीजनवल्लभत्वं, सर्वोत्कृष्टत्वञ्च सूचितम्।

शिवकर्णामृतेऽपि शिवस्य शारीरवर्णनं दृश्यते –

**"श्रीपार्वतीसुकृतचन्दनराजमान-**
**वक्षःस्थलाञ्चितममेयगुणप्रपञ्चम्।**
**वन्दारुभक्तजनमङ्गलदायकं तं**
**वन्दे सदाशिवमहं वरदं महेशम्॥"** (शि.क. १.१)

अत्र शिवस्य **वक्षःस्थलं** पार्वतीसुकृतचन्दनेन राजमानम्, **अमेयगुणप्रपञ्चम्, वन्दारुभक्तजनमङ्गलदायकम्, वरदं महेशम्** इति वर्णितम्। उभयत्रापि देवस्य शारीरवर्णनं भक्तिभावेन सह चित्रितम्। कृष्णवर्णने अलङ्कारप्रियता, शृङ्गारभावः प्रधानः; शिववर्णने तु रौद्रभावः, योगिनः स्वरूपम्, गृहस्थाश्रमस्यापि सूचना दृश्यते।

**२.६ गेयपदानां साम्यम्**

कृष्णकर्णामृतस्य प्रसिद्धः श्लोकः "मधुरं मधुरं वपुरस्य विभोः" इति अत्यन्तं गेयपदरूपेण प्रसिद्धः –

**"मधुरं मधुरं वपुरस्य विभोः**
**मधुरं मधुरं वदनं मधुरम्।**

**मधुगन्धि मृदुस्मितमेतदहो**
**मधुरं मधुरं मधुरं मधुरम्॥"** (कृ.क. १.९१)

अस्मिन् श्लोके मधुरशब्दस्य अष्टवारं प्रयोगः दृश्यते। प्रथमपादे वपुः मधुरम्, द्वितीयपादे वदनम् मधुरम्, तृतीयपादे मृदुस्मितम् मधुगन्धि च मधुरम् इति वर्णितम्। चतुर्थपादे तु केवलं मधुरशब्दस्य आवृत्तिः – एतदेव अस्य श्लोकस्य वैशिष्ट्यम्। अत्र कविः कृष्णस्य सौन्दर्यस्य सर्वाङ्गीणं माधुर्यं वर्णयितुं शब्दसौन्दर्यमपि प्रयुक्तवान्। अस्य श्लोकस्य गानप्रियता अद्यापि भारतीयसङ्गीतपरम्परायां दृश्यते।

शिवकर्णामृतेऽपि तादृशं गेयपदं विद्यते – शि.क. १.१३ श्लोकः –

**"तुङ्गान्तरङ्गघनगाङ्गतरङ्गसाङ्ग-**
**शृङ्गारसङ्गतमहोल्लसदुत्तमाङ्गम्।**
**अङ्गीकृताङ्गभवभङ्गमसङ्गलिङ्ग-**
**सङ्गीतमीशमनिशं कलयामि चित्ते॥"** (शि.क. १.१३)

अस्मिन् श्लोके गकारस्य, ङकारस्य, गकारस्य च मनोहरा आवृत्तिः दृश्यते। तुङ्ग-अन्तरङ्ग-गङ्ग-तरङ्ग-साङ्ग-शृङ्गार-सङ्गत-अ-ङ्ग इत्यादिषु पदेषु वर्णानां पुनरावृत्त्या एकः सङ्गीतमयः प्रवाहः निर्मितः। अयं श्लोकः गेयपदत्वेन प्रसिद्धिं प्राप्तः।

उभयत्रापि विशेषः अवलोकनीयः – कृष्णकर्णामृते मधुरशब्दस्य आवृत्तिः, शिवकर्णामृते ङ-गवर्णयोः मधुरा आवृत्तिः। उभयत्रापि शब्दानां पुनरुक्त्या एकं लयात्मकं सौन्दर्यं निर्मितम्। कृष्णकर्णामृते माधुर्यरसस्य, शिवकर्णामृते तु शिवस्य गाङ्गाधरत्व-शृङ्गारादिगुणानां प्रकाशनम् एतैः गेयपदैः कृतम्।

## ३. भावसाम्यम्

अत्र उभयोः काव्ययोः भावसाम्यं विचार्यते। केषुचित् श्लोकेषु भक्तस्य मनोभावः समानरूपेण प्रकटितः।

### ३.१ सख्यभावः

सख्यभावः भक्तस्य देवेन सह मित्रतायाः भावः। कृष्णकर्णामृते गोपालकैः सह कृष्णस्य सख्यभावः दृश्यते। अत्र भक्ताः कृष्णस्य बाललीलासु आनन्दम् अनुभवन्ति –

**"उपासतामात्मविदः पुराणाः**
**परं पुमांसं निहितं गुहायाम्।**
**वयं यशोदाशिशुबाललीला-**
**कथासुधासिन्धुषु लीलयामः॥"** (कृ.क. २.५४)

अत्र **उपासताम्** इत्यनेन आत्मविदः पुराणाः पुरुषाः गुहायां निहितं परं पुमांसमुपासते इति भावः। **वयम्** इत्यनेन भक्ताः स्वं यशोदापुत्रस्य बाललीलाकथारूपसुधासिन्धौ लीलयामः इति कथयन्ति। एषा सख्यभक्तेः पराकाष्ठा – यत्र भक्ताः देवं दूरस्थं नोपासते, अपि तु तस्य बाललीलासु साक्षात् भागं गृह्णन्ति।

शिवकर्णामृतेऽपि सख्यभावः दृश्यते, विशेषतः प्रमथगणैः सह शिवस्य सम्बन्धे। यथा –

**"कैलासभूमीभृदिलाततेषु**
**विभूतिरुद्राक्षधराखिलाङ्गाः।**
**तदेकभक्ताः प्रमथाः पठन्ति**
**शम्भो महेश्वर शङ्करेति॥"** (शि.क. २.६१)

अत्र **कैलासभूमीभृदिलाततेषु** – कैलासपर्वतस्य पार्श्वेषु, **विभूति-रुद्राक्षधराखिलाङ्गाः** – विभूतिं रुद्राक्षं च धृतवन्तः सर्वाङ्गेषु, **तदेकभक्ताः प्रमथाः** – तस्य एकान्तभक्ताः प्रमथगणाः, **शम्भो महेश्वर शङ्करेति** – शम्भो महेश्वर शङ्कर इति नामानि **पठन्ति**। अत्र प्रमथाः शिवस्य सखायः इव तेन सह विहरन्ति, तस्य नाम कीर्तयन्ति। उभयत्रापि देवेन सह सख्यभावेन सम्बन्धः चित्रितः।

### ३.२ देवतान्तरभक्तौ अपि स्वेष्टदेवे अनुरागः

कृष्णकर्णामृते भक्तः कथयति यद्यपि सः शैवमतानुयायी, तथापि तस्य मनः कृष्णे एव रमते –

**"शैवा वयं न खलु तत्र विचारणीयं**
**पञ्चाक्षरीजपपरा नितरां तथापि।**
**चेतो मदीयमतसीकुसुमावभासं**
**स्मेराननं स्मरति गोपवधूकिशोरम्॥"** (कृ.क. २.२४)

अत्र **शैवा वयम्** – वयं शैवाः, **न खलु तत्र विचारणीयम्** – अत्र न कापि विचारणीया, **पञ्चाक्षरीजपपरा नितराम्** – नितरां पञ्चाक्षरीजपपरायणाः, **तथापि** – तथापि, **मदीयं चेतः** – मम चेतः, **अतसीकुसुमावभासं स्मेराननम्** – अतसीपुष्पसदृशं स्मितयुक्तमुखम्, **गोपवधूकिशोरम्** – गोपवधूनां किशोरं कृष्णम्, **स्मरति** – स्मरति। अत्र भक्तः स्वयं शैवः सन्नपि कृष्णभक्तिं न त्यजति।

एवमेव शिवकर्णामृते भक्तः कथयति यद्यपि सः वैष्णवमतमपि मन्यते, तथापि तस्य मनः शिवे एव रमते –

**"शैवं मतं मम तु वैष्णवमप्यभीष्टं**
**सर्वेषु दैवतपदेषु समत्वबुद्धेः।**
**सत्यं तथापि करुणामृदुतः शिवस्य**
**सर्वेश्वरस्य पदमेति सदा मनो मे॥"** (शि.क. २.२७)

अत्र **शैवं मतम्** – शैवमतम्, **मम तु वैष्णवमपि अभीष्टम्** – मम वैष्णवमपि अभीष्टम्, **सर्वेषु दैवतपदेषु समत्वबुद्धेः** – सर्वेषु देवतास्थानेषु समत्वबुद्धेः, **सत्यम्** – सत्यम्, **तथापि** – तथापि, **करुणामृदुतः शिवस्य सर्वेश्वरस्य** – करुणया मृदुः यः शिवः सर्वेश्वरः, **तस्य पदम्** – तस्य पदम्, **मे मनः सदा एति** – मम मनः सदा गच्छति।

उभयत्रापि आश्चर्यजनकं साम्यम् – एकत्र शैवः सन् कृष्णं स्मरति, अपरत्र वैष्णवः सन् शिवं स्मरति। एतत् भक्तेः सार्वभौमत्वं दर्शयति।

## ४. उपसंहारः

एवं दृश्यते यत् श्रीकृष्णकर्णामृतस्य प्रभावः श्रीशिवकर्णामृतोपरि स्पष्टतया दृश्यते। यतः श्रीशिवकर्णामृतं श्रीकृष्णकर्णामृतात् परवर्ति, अतः तस्य रचनाशैल्याम्, अलङ्कारयोजनायाम्, भावचित्रणे च श्रीकृष्णकर्णामृतस्य प्रभावः लक्ष्यते।अप्पय्यदीक्षितेन शिवभक्त्या, अलङ्कारनैपुण्येन, शब्दवैचित्र्येण च कृष्णकर्णामृतस्य अनुकरणं कृतम्, किन्तु स्वकीयेन मौलिकेन दृष्टिकोणेन एतत् काव्यं पृथक् वैशिष्ट्यं धारयति। उभे अपि काव्ये संस्कृतभक्तिकाव्यपरम्परायाम् अमूल्यरत्ने इति निःसन्देहं वक्तुं शक्यते।

कृ.क. -- श्रीकृष्णकर्णामृतम्

शि.क. -- श्रीशिवकर्णामृतम्